International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(6): 34-36
© 2024 IJSR
www.anantaajournal.com
Received: 16-09-2024
Accepted: 19-10-2024

**Dr. Arathi K**
Department of Sanskrit,
Sree Krishna College,
Guruvayoor, Kerala, India

**Corresponding Author:**
**Dr. Arathi K**
Department of Sanskrit,
Sree Krishna College,
Guruvayoor, Kerala, India

# महाभाष्यरीत्या लिङ्गचिन्तनम्

**Dr. Arathi K**

**सारांश**
संस्कृतव्याकरणशास्त्रं त्रिमुनिव्याकरणम् इति नाम्ना व्यवह्रियते । पाणिनिः,कात्यायनः,पतञ्जलिश्च भवति त्रिमुनयः । प्रथमं पाणिनिना अष्टाध्याय्याः रचना कृता । अयं ग्रन्थः व्याकरणशास्त्रस्य मूलरूपेण स्वीकृतः । पाणिनेरनन्तरं कात्यायनः वार्त्तिकद्वारा, पतञ्जलिः महाभाष्यद्वारा च अस्य व्याकरणस्य पोषणं कृतवन्तौ । पाणिनेः अष्टाध्याय्याः व्याख्यारूपेण उपलभ्यमान पतञ्जलेः महाभाष्यं नामके ग्रन्थे स्त्रियाम् इति सूत्रे किं नाम लिङ्गमिति निरूपितम् । तदधिकृत्य अत्र प्रतिपादनं क्रियते ।

**कूटशब्दाः** - पुल्लिङ्गः, स्त्रीलिङ्गा, नपुंसकलिङ्गं, विवक्षा

## प्रस्तावना

## महाभाष्यरीत्या लिङ्गचिन्तनम्

संस्कृतभाषायां पुल्लिङ्गस्त्रीलिङ्गनपुंसकलिङ्गभेदेन लिङ्गत्रयं वर्तते । लिङ्गव्यवस्था च शब्दानां रूपानुसारं क्रियते । पातञ्जलमहाभाष्ये स्त्रियाम्[१] इति सूत्रविचारप्रसङ्गे पतञ्जलिना लिङ्गलक्षणमुच्यते यथा-

“स्तनकेशावती स्त्री स्याल्लोमशः पुरुषः स्मृतः ।
उभयोरन्तरं यच्च तदभावे नपुंसकम्[२]” ।।

स्तनकेशवती स्त्री स्यात् इत्यस्य स्तनकेशवत्वं स्त्रीत्वम् इत्यर्थः । लोमवत्वं नाम स्मस्रुमत्वं पुंस्त्वं । स्त्रीत्वपुंस्त्वयोः अभावे उभयोः यत् सदृशं तत् नपुंसकं भवति । एतत् लौकिकं प्रसिद्धं लिङ्गं । अस्मिन् लौकिकलिङ्गस्वीकारे दोषः उच्यते यथा-

“लिङ्गात् स्त्रीपुम्सयोर्ज्ञाने भ्रूकुंसे टाप् प्रसज्यते ।
न त्वं खरकुटीः पश्य खट्वावृक्षो न सिध्यतः[३]” ।।

स्तनकेशादिवत् लिङ्गज्ञाने अत्र प्रथमदोषः भवति भ्रूकुंसे टाप् प्रसज्यते इति । भ्रूकुंसो नाम नर्त्तकः । अर्थात् भ्रूकुंसो नाम स्त्रीवेषधारी नटः । पुरुषस्य भ्रुवोः सौन्दर्यं न भवति । अतः अञ्जनादिकं निक्षिप्य तत्र यः सौन्दर्यादिकं संपादयति सः भ्रूकुंसः । नटस्य कृत्रिमस्तनकेशादिमत्वात्स्तनकेशवती स्त्री इति स्त्रीत्वे विवक्षिते टाप् स्यात् । अतः भ्रूकुंसा इति रूपं भवेत् इति प्रथमो दोषः ।

खरकुटीः इत्यत्रापि दोषः । खरकुटीशब्दस्य नापितगृहमित्यर्थः । तत्र लोमानां आधिक्यदर्शनात् लोमशः पुरुषः स्मृतः इति पुल्लिङ्गता भवेत् । पुरुषबोधकपरे 'तस्माचछसो नः पुंसि' इति सूत्रेण नत्वं स्यात् । एवं खरकुटीन् इति रूपं स्यात् इति द्वितीयः दोषः ।

खट्वावृक्षौ इत्यत्र खट्वा इति स्त्रीलिङ्गशब्दः, वृक्षः इति पुल्लिङ्गशब्दश्च भवति । किन्तु अत्र खट्वे स्तनकेशादिकं न दृश्यते । खट्वावृक्षयोः स्तनकेशादि लौकिकलिङ्गानि किमपि नास्ति इत्यतः खट्वावृक्षौ न सिध्यतः इति तृतीयो दोषः ।

चेतनेषु दृश्यमानानां स्फुटरूपाणां स्तनकेशादि उपव्यञ्जनानां दर्शनात् तेषां लिङ्गनिर्णयः क्रियते । किन्तु खट्वावृक्षादिषु अचेतनेषु स्पष्टरूपाणाम् उपव्यञ्जनानाम् अभावात् लिङ्गनिर्णयः कर्तुं न शक्यते । अतः कथं पुनः सत् नाम लिङ्गं द्रष्टुं शक्यं ? इत्यत्र समाधानमाह-

"असत्तु मृगतृष्णवत् गन्धर्वनगरं यथा ।
आदित्यगतिवत् सन्न वस्त्रान्तर्हितवन्न"[४] । ।इति ।

अत्र मृगतृष्णवदधिकृत्य पूर्वमेवोक्तम् ।यथा मरीचिकां दृष्ट्वा पूर्वपूर्वजलप्रत्ययाहितसंस्कारात् मृगाणां जलेऽसत्यपि सलिलनिर्भासा बुद्धिर्जायते । एवमेव तारका, पुष्यः, नक्षत्रं इत्यादिषु अचेतनेषु लोके लिङ्गानुगतत्वम्, स्त्रीपुंनपुंसकानां बहिर्विद्यमानलिङ्गनिमित्तत्वेन पुनः 'गन्धर्वनगरं यथा' इति ।आकाशे मेघाः विभिन्नरूपेण प्रतीयते । तत्र यथा नगररूपेण प्रतीयते तत् प्रायशः गन्धर्वनगरं इति चिन्तयति । वस्तुतः गन्धर्वनगरं किमपि नास्ति, परन्तु मेघानां सन्निवशात् असदपि गन्धर्वनगरः प्रतीयते । एवं गन्धर्वनगरं अन्तरीक्षे कदाचित् नास्ति चेदपि तत्सदृशवस्त्वन्तरग्रहणेन गन्धर्वनगरं स्मर्यते तद्वत् खट्वावृक्षयोः सल्लिङ्गं द्रष्टव्यम् ।

'आदित्यगतिवत् सन्न' इति । आदित्यस्य गतिः द्रष्टुं वयं न शक्यते । किन्तु प्राते, मध्याह्ने, सायंकाले इत्येवं कालान्तरेण आदित्यस्य स्थानान्तरप्राप्त्या गतिः अनुमीयते । एवं खट्वावृक्षयोः लिङ्गम् अनुमीयते इति ।

'वस्त्रान्तर्हितवच्च तत्' इति । वस्त्रान्तर्हितानिद्रव्याणि नोपलभ्येते चेदपि तानि वस्त्रापाये उपलभ्यन्ते । किन्तु खटवावृक्षादिषु लिङ्गं तक्षणादिः नोपलभ्यते इति । तदुक्त– "खट्वावृक्षयोः पुनः येऽपि रथकाराः वाशीवृक्षादनहस्ताः मूलात्प्रभृत्याऽऽग्रात् वृक्षांस्तक्ष्णुवन्ति तेऽपि तयोर्लिङ्गं नोपलभ्यन्ते"[५] इति । पुनः केन एतत् "अवसीयते खट्वावृक्षयोः सल्लिङ्गं नोपलभ्यत"[६] इति विचारप्रसङ्गे पतञ्जलिना षट्भिः प्रकारैः सतां भावानां अनुपलब्धिः प्रतिपादिता । ताश्च - अतिसन्निकर्षात्, अतिविप्रकर्षात्, मूर्त्यन्तरव्यवधानात्, तमसावृतत्वात्, इन्द्रियदौर्बल्यात्, अतिप्रमादात् इति । अतिसन्निकर्षात् यथा-स्वचक्षुर्गतस्याञ्जनादेः । अतिविप्रकर्षात् यथा-कुडयादिव्यवहितस्य सुवर्णादिः । तमसावृतत्वात् यथा - अन्धकाराक्रान्तस्य घटादेः । इन्द्रियदौर्बल्यात् यथा-चक्षुरादेः तिमिराद्युपघातात् । अतिप्रमादात् यथा-माषराशौ माषः प्रक्षिप्तः पृथग्नोपलभ्यते ।

अत्र कश्चित् हेतुः द्रष्टव्यः । तत्र येन हेतुना खट्वावृक्षयोः सत् लिङ्गं नोउपलभ्यते इति चेत् "तयोस्तु तत्कृतं दृष्ट्वा"[७] इति। स्त्रीपुंसकार्यं टाबादिकं दृष्ट्वा लिङ्गानुमानम् इति । यथा स्त्रीकृतं शब्दं दृष्ट्वा स्त्रीति अवसीयते, पुंस्कृतं शब्दं दृष्ट्वा पुमान् इति । तत् साधयति यथा आकाशेन ज्योतिषः इति । आकाशं दृष्ट्वा ज्योतिरत्र इति गम्यते, ज्योतिर्निमित्तं हि आकाशम् । तद्वत् लिङ्गानुमाने सति लिङ्गकार्यं टाबादिकं, लिङ्गकार्ये च टाबादौ सति लिङ्गानुमानमिति अन्योन्याश्रयः । अन्योन्याश्रयाणि कार्याणि न प्रकल्पन्ते ।

तटे तटः, तटी, तटम् इति लिङ्गत्रयं एकस्मिन्नर्थे प्रयुज्यते इत्यतः लिङ्गम् आस्थातुं कश्चित् स्वकृतान्तः आस्थेयः इति । कोऽसौ स्वकृतान्तः नाम "संस्त्यानप्रसवौ लिङ्गम् आस्तेयो स्वकृतान्ततः"[८] इति । अत्र संस्त्यानो नाम अपचयः, स्वकृतान्तः नाम वैयाकरणसिद्धान्तः । कस्य पुनः संस्त्यानं स्त्री प्रवृत्तिर्वा पुमान् इतुक्ते गुणानाम् । केषां गुणानां नाम शब्द-स्पर्श-रूप-रस-गन्धानाम् । "यत्राल्पीयांशो गुणस्तत्रावरतत्रयः रसगत्धौ न सर्वत्र"[९] ।

सर्वभावेषु आविर्भावतिरोभावस्थितिरूपलिङ्गत्रयसम्भवः अस्ति चेत् कथं व्यवस्था क्रियते इत्यत्र समाधानमाह विवक्षातः इति । संस्त्यानविवक्षायां स्त्री, प्रसवविवक्षायां पुमान्, उभयविवक्षायां नपुंसकम् । केषां विवक्षा चेत् "तस्योक्तौ लोकतो नामेति"[१०] । अत्र लोक शब्देन शिष्टाः विवक्षिताः । अतः शिष्टप्रसिद्धेः बलात् भवति शास्त्रेषु लिङ्गव्यवस्था ।

## उपसंहार

पातञ्जलमहाभाष्ये स्त्रियाम् इति सूत्रे किं नाम लिङ्गमिति निरूपितम् । तत्र गुणावस्था लिङ्गमिति लिङ्गलक्षणम् अङ्गीक्रियते। सर्वभावेषु आविर्भावतिरोभावस्थितिरूपलिङ्गत्रयसम्भवः अस्ति इत्यतः कथं व्यवस्था क्रियते चेत् विवक्षातः इति । केषां विवक्षा चेत् शिष्टानाम् । अतः शिष्टप्रसिद्धेः बलात् भवति शास्त्रेषु लिङ्गव्यवस्था ।

## उल्लेखा


1. अष्टाध्यायी ४.१.३.
2. महाभाष्यम् पृ.१७
3. महाभाष्यम् पृ.१७
4. महाभाष्यम् पृ.१८
5. महाभाष्यम् पृ.२०
6. महाभाष्यम् पृ.२०

7. महाभाष्यम् पृ.२१
8. महाभाष्यम् पृ.२२
9. महाभाष्यम् पृ.२३
10. महाभाष्यम् पृ.२५

**संदर्भ सूची**


1. पाणिनि, अष्टाध्यायी, सम्पा.डा. अभिमन्युः, प्रतिभा प्रकाशन्, दिल्ली, २०११.
2. पाणिनि, लिङ्गानुशासनं, हरस्वरूप वशिष्ठ व्याख्यानं, शीतल प्रीन्टर्स्, जयपुर्, २००६
3. पतञ्जलि, व्याकरणमहाभाष्यं, सम्पा. प्रोफेसर् बालशास्त्री, प्रतिभा प्रकाशन्, दिल्ली, २००१
4. भर्तृहरिः, वाक्यपदीयं,सम्पा. आचार्य पं.सत्यनारायण खण्डूडी, चौखम्बा कृष्णदास अकादमी, वाराणसी, २००७
5. यज्ञवीर दहिया, संस्कृतभाषादर्शनं, भारतीय विद्या प्रकाशनम्, वाराणसी,२००१